# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-3)(New&Old)** | **प्रश्नपत्रम् – 5** | गुणाः –70 |
| विषयः – साहित्यम् | **कोड –C.C.2.3.5** | समयः- 8 तः 11 पर्यन्तम् |
| दिनाङ्कः –14/10/2019 | सन्दर्भग्रन्थः – दशरूपकम् (प्रथमद्वितीयप्रकाशौ) | |

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ अधोप्रदत्तासु कारिकासु केचन द्वे सप्रसङ्गं व्याख्येये।** १०

१ गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहुः।
द्वादशाङ्गं पताका स्यान्न वा स्यात्प्राप्तिसंभवः॥

२ औत्सुक्यमात्रमारम्भः फललाभाय भूयसे।
प्रयत्नस्तु तदप्राप्तौ व्यापारोऽतित्वरान्वितः॥

३ दशरूपानुकारेण यस्य माद्यन्ति भावकाः।
नमः सर्वविदे तस्मै विष्णवे भरताय च॥

**प्रश्न २ निम्नलिखितयोः कस्याप्येकस्य प्रश्नस्योत्तरं विवर्णयत।** १०

१ मुखसन्धेः अङ्गानि लक्षणोदाहरणैः विशदयत।

२ दशरूपकप्रणेतुः परिचयो देयः।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ केचन द्वे कारिके व्याख्येये।** १०

१ इष्टस्यार्थस्य रचना गोप्यगुप्तिः प्रकाशनम्।
रागः प्रयोगस्याश्चर्यं वृत्तान्तस्यानुपक्षयः॥

२ पताकानायकस्त्वन्यः पीठमर्दो विचक्षणः।
तस्यैवानुचरो भक्तः किञ्चिदूनश्च तद्गुणैः॥

३ एकविद्यो विटश्चान्यो हास्यकृच्च विदूषकः।
लुब्धो धीरोदत: स्तब्धः पापकृद्व्यसनी रिपुः॥

**प्रश्न ४ अधः प्रदत्तयोः प्रश्नयोः कश्चिदेकः प्रश्नः विवर्ण्यः।** **१०**

१ निर्वहणसन्धेः भेदान् लक्षणोदाहरणैः प्रतिपादयत।

२ नायकस्य सात्विकगुणान् लक्षणोदाहरणैः व्याख्यात।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ निम्नलिखितासु द्वयोः ससन्दर्भं व्याख्या कार्या।** **१०**

१ धीरा सोत्प्रासवक्रोक्त्या मध्या साश्रु कृतागसम्।
खेदयेद् दयितं कोपादधीरा परुषाक्षरम्॥

२ विशोका सात्त्वती सत्त्वशौर्यत्यागदयार्जवैः।
संलापोत्थापकावस्थां साङ्घात्य: परिवर्तकः॥

३ देशभाषाक्रियावेषलक्षणाः स्युः प्रवृत्तयः।
लोकादेवावगम्यैता यथौचित्यं प्रयोजयेत्॥

**प्रश्न ६ अधः प्रदत्तयोः कञ्चिदेकं प्रश्नं विशदयत।** **१०**

१ योषिदलङ्काराणां परिचयं विशदयत।

२ काः अष्टविधाः नायिकाः ? सोदाहरणं प्रस्तूयताम्।

**प्रश्न ७ निम्नलिखितेषु दशप्रश्नानां लघूत्तराणि लिखत।** **१०**

१ दशरूपकस्य प्रणेता कः ?

२ ग्रन्थकारेण ग्रन्थेऽस्मिन् कति मङ्गलाचरणानि विरचितानि ?

३ नाट्यशास्त्रस्य प्रणेता कः ?

४ दशरूपके कति प्रकाशाः सन्ति ?

५ दशरूपकप्रणेतुः पितुः नाम किम् ?

६ कति रूपकाणि ? कानि च तानि ?

७ शृङ्गाररसे का वृत्तिः ?

८ वस्तु कतिविधम् ?

९ का वृत्तिः सर्वेषु रसेषु भवति ?

१० कति सन्धयः ? के च ते ?

११ दशरूपके प्रथमप्रकाशे कति कारिकाः सन्ति ?

१२ अर्थप्रकृतयः कति ?

१३ रूपकाणां भेदकतत्त्वानि कति ?

१४ दशरूपके द्वितीयप्रकाशे कति कारिकाः सन्ति ?

१५ फलार्थिभिः प्रारब्धस्य कार्यस्य कति अवस्थाः ?